Journal of Advances and Scholarly Researches in Allied Education
Vol. 13, Issue No. 1, April-2017, ISSN 2230-7540

# कालिदासे शाकुंतलनाटक: सारसंग्रह:

**Nisha Kumari[1]* Dr. Sundra Mathto[2]**

[1] Research Scholar, CTU, Ahmadabad

[2] Associate Professor, Department of Physics, CTU, Ahmadabad

***सार –*** *कविकुलगुरोः महाकवेः कालिदासस्य जन्म कुत्र कदा चाभूत् इति विषये न किमपि निश्चिततया वक्तुं शक्नुमः। अस्य जन्म विषये जन्मस्थानविषये च विचारकविदुषां वैमत्यं विद्यते। तथाप्यस्य जन्मविषये प्रायः भारतीयाः विद्वांसो वदन्ति यद् विक्रमादित्यस्य विक्रमसंवत्सरसंस्थापकस्य राज्यात् पूर्वं प्रथम शताब्द्यां महाकवेः कालिदासस्य संस्थिति रासीत्। पाश्चात्याश्च प्रायः सर्वेऽस्य कवेः स्थितिम् ईसवीये चतुर्थ शतके गुप्तसाम्राज्ये स्वीकुर्वन्ति। महाकवेः कालिदासस्य प्राधान्येन सप्तैव रचनाः सन्ति, इति स्वीकुर्वन्ति विद्वांसः। रचनानां नामानि – कुमारसंभवमहाकाव्यं, रघुवंशमहाकाव्यञ्चेति द्वे महाकाव्ये, ऋतुसंहारम् मेघदूतञ्चेति द्वे खण्डकाव्ये अभिज्ञानशाकुन्तलम् विक्रमोवर्शीयं मालविकाग्निमित्रञ्चेति त्रीणि नाटकानि एवं सत्व काव्यग्रन्थानेष महाकविः रचयामास। महाकविः नाट्यलेखनकलाकुशलो बभूव। अस्य नाटकेषु घटनासौष्टवं, स्वाभाविकविषयवर्णनं, चरित्रानुसारिपात्रचयनं, स्वभावोपस्थिताभिनयं, काव्ये रसपारिकम् सुतरां विलोकयामः।*

---------------------------------x---------------------------------

**प्रस्तावना:**

इह खलु नानाविधसंसारक्लेशपरित्रस्तस्य चेतसो निर्दूतये सत्काव्या स्वादसदृशं नान्यदुपलभ्यते बस्तु । तत्र हि वाच्यमाने तिरोभवति त्रिषादो मनसः प्रादुर्भवत्यानन्दः. समधिगम्यते व्यावहारिकं प्राविण्यम्, प्रतिभाति च निकामं बुद्धिः। निरन्तरं तत्संसेवमानश्च मनुजो न चिरादेव तिरस्क रोति ब्रह्मनन्दम् ।

तच्च काव्यं नाम रसात्मकं वाक्यं श्रव्यदृश्यभेदाद्विविधम् । तत्र च श्रवणमात्रेणानन्दजनकानि रघुवंशकुमारसंभत्रप्रभृतीनि श्रव्यकाव्यानि । सपदि चक्षुःश्रवणयोः प्रतिजनकानि नानारसभावभास्वराणि नटैरभिनेयार्थानि शाकुन्तळमाळविकाग्निमित्रप्रमुखान्यष्टाविंशतिप्रकाराणि रूपकोपरूपकापर- पर्यायाणि दृश्यकाव्यानि समधिकरमणीयानि श्रव्येभ्यः ।

निसर्गत एव रमणीयं रूपकं नामतत्र च नाटकं, तत्र च सुकविग्र थितवस्तुकम्, तत्र च श्रीमता महाकविकुटालंकारेण श्रीकालिदासेन प्रथित- मिन्यहो रमणीयतायाः काष्टा ।

नैकविधव्यवहारमूलकतया च रूपकाणां स्वत एव दुर्गमत्वेनावश्यं व्याख्यासापेक्षत्वम् : अभिज्ञानशाकुन्तले च समीचीनाया व्याख्याया अभाबाहुर्बोधतया रसपारभूततया च तदास्वादमभिलष्यन्तो रसिका आमूलं कटकच्छन्न केतकीप्रसूनमनुधावन्तो मधुकरा इव नितान्तं दुःखायन्त इति तस्य सरलव्याख्यासापेक्षत्वमवबुध्यास्माभिर्लब्धा महता प्रयत्नेनाष्टभाषाचक्र वर्तीनिवासाचार्यत्रिरचिता शाकुन्तलव्याख्या । इयं व्याख्या स्फुटत्वा द्विस्तुतत्वाच्छास्त्रप्रमाणितयुक्तिमत्वाच्छीकालिदासकवशि हृदयस्य सर्वतः प्रक- शनेऽलमितिविचार्यैमां व्याख्यासान्भ्रलिपितोऽस्माभिर्देवनागराक्षरैर्विपरिवर्षे मुद्रिता । राघवभट्टविरचितार्थद्योतनिकाख्या व्याख्याप्यनया साकं मुद्रिता ।

अत्र च यद्यपि बहुविधानि पाठान्तराणि तथापि तेषामतिमात्रशोभावह

कस्वाभावाद्द्वसंवादित्वाभावाच्च नात्र संग्रहणम् । कितु यानि पाठान्तराणि

निवासाचार्येणादृतानि व्याख्यातानि । तान्येव तत्र तत्र टिप्पणीरूपेण स्थापितानि ।

प्रथमं चाध्ययनायकादिपात्रनिरूपणं प्रत्यङ्गतकथांशसूचपत्रे पद्य नामकारादिक्रमेण सूचीपत्रं च संयोजितम् ।

www.ignited.in

अत्र च नाटकस्य दुवघतया दापाणां मनुजमात्रसाधारणत्वान्मम प्रयासस्याभिनयस्वाद्वा यद्यरस्खलितं ळक्षयेयुः सुधियस्तान्निवेदनेन मां कृता थीकुर्वन्वाििति ।

**गुणान्वेषिणां परिचारकस्य**

**श्रीकृष्णसात्मज-गंगाविष्णोः**

तत्रादौ महाकवेः श्रीकालिदासस्य प्रादुर्भावावसरस्तावनिर्णीयते । संक्षिप्तश्चयं विस्तरशः अपाशास्रिणः प्रणीते महाकविः श्रीकालिदास इति श७ प्रबन्धे द्रष्टव्यः ।

( १ ) तत्र केचिदर्वाचीना वैज्ञानिकम्मन्या महाकविप्रकांडममुं सप्तमश ताब्द्यां प्रादुर्भूतं मन्यन्ते । ( २ ) अपरे तु ‘ धन्वन्तरिक्षपणकामरासंह- शंकुवेतालभट्टघटखर्परकालिदासाः । स्यातो वराहमिहिरो नृपतेः सभायां रत्नानि वै वररुचिर्नव त्रिक्रमस्य ॥ » इति ज्योतिर्विदाभरणीयपद्यानुसारेण नवरस्नान्तर्गततया वराहमिहिरसमानकालिकत्वं श्रीमतः कालिदासस्य सुस्पष्टम् । ततश्च षष्टशतकतत्वमर्थादेव संसिद्धमित्याहुः । ३ ) अपरे बाहुः श्रीमान्मातृगुप्ताचार्यं एव कालिदासापरनामा । मात्रा कार्या गुप्तो दासत्वाद्रक्षित इति व्युत्पत्तेः। स च षष्ठशताब्द्यां ( वि० समुद्धत इत्य यमेव कालिदासाबस्थितिसमय इति । ( ४ ) अन्येतु “ दिङ्गानां पथि पारहरन् स्थूल्हस्तावलेपान् प्र इति मेघदूते कालिदासेन दिङ्नागाचार्यस्य वननादिङ्नागस्य च षष्टशताब्दीसमुद्भतत्वात्तस्य च कालिदासप्रतिभटतया प्रासैद्वत्वात्कालिदासस्यापि
स्रिस्तीयषष्ठशताद्दीसमुद्रेतत्वमेवोति चदन्ति । ( १ ) तदितरे तु * तत्र हूणाविरोधानां भर्जुष्ट व्यक्तविक्रमम् । कपोल-पाटछादेशि बभूव खुचेष्टितम् ॥ ( ४६६ ) ११ इति रघुवंशे कालिदासेन धुकर्तृकस्य हूणविजयस्याभिधानाङ्कणानां च पंचमशताब्द्युत्तरमेव भारतवर्षे प्रशाद्विक्रमातिशयशाब्यािचि तानेव रघोः प्रतिभटपक्षे क्षिपतः काठेिदाः सस्यार्थादेव ततः परभात्रित्वामित्याचक्षते । ( ६ ) केचित्तु कुमारसंभवे तिथौ च जामित्रगुणान्वितायाम् ।। ७-१ )? इति पर्व कालिदासेन जामित्रपदमुपनिबद्धम् । तच्च प्रकिभाषावार्जुनो डायमेन् ( Daynettan ) शब्दस्यापभ्रृशः । यदा श्रीकेभ्योऽधिगतं ज्योतिःशास्त्रं भारतवर्षीयैस्तदैव संस्कृतभाषायां प्रविष्टोऽयं शब्दः । यैश्च ग्रीकेभ्यो ज्यौतिषमधिगतं तेषु

भारतवर्षीयपंडितेषु श्रीमानार्यभट्ट एव प्रथमः । स च खिस्तयपंचमश

**कालिदासे शाकुंतलनाटकः सारसंग्रहः**

ताब्द्यां प्रादुर्भात इति तदुत्तरशैव्येव श्रमान्कादास इति प्राहुः । ( ७ } अपरे तु रघुवंशे “ छाया हि भूमेः शशिनो मलबे नारोपिताः शुद्धिमतः प्रजाभिः ? इति ( १४४० ) पथे श्रमता कालिदासेन चंद्रहासस्य पारमार्थिकं स्वरूपमुपनिबद्धम् । तच्चार्यमठेनैव प्रकेभ्यः प्रथमतो विदितमिति तदुपनिबन्धनकर्तुः कालिदासस्यार्यभट्टतोऽवद्यार्चनत्वमर्थादेन षष्ठशताब्दी समुद्भतस्वमायातामेति प्रवदन्ति । ( ८) अन्ये तु संस्कृतभाषाभ्युदयस्य समयद्वयं परिकल्पयन्ति । तत्रादिमः श्रुत्यादीनामुत्पत्तेरर्थादतीव प्राचीनः । द्वितीयस्तु खिस्तयद्वितीयशताब्द्युत्तरकालिकः । तत्रैव च कालिदासादनां प्रादुर्भात्र इत्याहुः } (९) केचित्तु श्रीमतः कालिदासस्य पत्रेषु अश्वत्र- षप्रणीतबुद्धचारितगतपद्यानां छायामाशंकमाना अश्वघोषसमानकाटिकः कालिदास इत्याहुः । ( १० ) केचित्तु “ काव्यत्रयं सुमतिछद्रघुवंशपूर्वं जातं यतो नतु कियच्छ्रुतिकर्मवादः । ज्योतिर्विदाभरणकालविधानशास्त्रं अकालिदासकबितो हि ततो वभूव । " इति ज्योतिर्विदाभरणान्तिमाध्या यवचनतः कालिदासस्यैव ज्योतिर्विदाभरणप्रणेतृतां निश्चित्य तत्रस्येनैव << वर्षैः सिन्धुरदर्शनांबरगुणैर्याते कठौ संमिते मासे माधवसंज्ञकेऽत्र विहिते पृथक्रियापक्रमः । ॐ इति वचनेन कालिदासस्य कलियुगारं भितः ३०६८ तमे वर्षेऽर्थात्स्रिस्तीयशकारंभतः प्रथमशताब्द्यां वर्तमानत्वं प्राहुः। ११ ; अन्ये तु घुवंशादिप्रणेतुः कालिदासस्य विक्रमार्कसमानकालिफतामभिप्रेय विक्रमार्कस्य विस्तीयषष्टशताब्द्यामेवावस्थानं साधयितुं प्रयतन्ते । कंतु सर्व- मेतदसंगतं चात्यन्तमसमंजसं चेति प्रमाणशतैरन्यत्र अप्पाशास्त्रिणा प्रपंचि तम् । समयेऽत्र विक्रमादित्यसभायां कालिदासाख्यः कोऽपि कविरासीदेवेति निर्दिष्टपूर्वैः प्रमाणैरवबोध्यम् । धुवंशादिप्रणेता तु श्रमान्काळिदासस्ततो ऽपि सुतरां प्राचनः । तंत्रवार्तिकादिममांसाप्रबंधानां प्रथयिता हि भ्रमा- कुमारिलभट्टस्तन्त्रघार्तिके-“ सतां हि संदेहपदेषु वस्तुषु प्रमाणमंतः करणप्रवृत्तयः । ” इति कालिदासस्यशाकुन्तळगतं पद्यार्घमुदाजहार । कुमारिलभट्टश्च श्रीशंकराचार्याणां समानकालिकः । श्रीशंकराचार्यांश्च

युधिष्ठिरस्य सप्तविंशतिशताब्द्यामाविद्यन्तेत द्वारकामठीय्सुधन्वताम्रशासनतो

निश्वस्यते । संप्रति पुनर्युधिष्ठिरशकस्यैकपंचाशत्तमा शताब्दति सुस्पष्टमेवेतः पूर्वं चतुर्विंशशताब्यां श्रीशंकराचार्यप्रादुर्भाव इति । तत्समानकाटिकेन कुमारिलभट्टेने कालिदासीयपद्यस्योदाहरणात्ततोऽपि प्राचीनोऽर्थादितः पूर्वं चतुर्विंशतिशताब्दतः पौर्विकः श्रीमान्कालिदास इति स्पष्टम् ।

www.ignited.in

कालिदासश्च श्रीमत्याः काल्याः प्रसादादेव कात्रित्वमुपागत इति प्रबल दन्ति । अत्रेयं किंवदन्ती । आस्तीत्पुरा कऽपि भूषादः । तस्य चासी पाण्डिततमा कन्या । तस्याश्चानुरूपं वरमनुसन्दधानोऽसफलीभूतमनोरथे भूपः कदाचिदपरेद्यवि प्रभाते यो नयनगोचरतामागच्छेत्तस्मै कन्यकायाः प्रदानं प्रतिजज्ञे । ततश्चात्मनस्तनयाय न प्रयच्छति कन्यकां भूपाल इति रुष्टेन मन्त्रिणा कस्यचिवृक्षस्य शाखाग्रमारुह्य मूलमुच्छिन्दन्कोऽपि द्विजगो- पाछो राजद्वार उपस्थापितः ! राज्ञा च यथाप्रतिज्ञे तस्मा एत्र समर्पिता कन्या खया । तदनु निशि विळासमन्दिरं गतया राजकन्यकयाऽवबुद्धः पत्युरतिमात्रमसमञ्जसभावः । ततश्च तया सुपरुषं निर्भर्ह्सतस्तत्पतिररण्यं गत्वा कार्यमाराध्य सम्पाद्य चालौकिकं कवित्वं कदाचिन्निचि प्रतिनिवृत्तो विलोक्य पितिं गर्भागारद्वारं प्राह “कान्ते ! दीयतामपावृतकघटं द्वारम् " इति । सापि प्रत्यभिज्ञाय दयितं प्रति प्राह । “ अस्ति कश्चि द्वाग्विशेषः ? इति । अयं तु तत्प्रतिवचनगतं पदत्रयमधिकृत्य काव्यत्र- यमेव रचयाञ्चकार । “ अस्त्युत्तरस्यां दिशि देवतात्मा ? ’ इत्यारभ्य कुमा रसम्भवाख्यं सप्तदशसर्गात्मकं महाकाव्यं “ कश्चित्कान्ताविरहगुरुणा १५ इत्यादि मेघसंदेशाख्यं संघातकाव्यं “ वागर्थाविव सम्पृक् ?’ इति रघुवं- शाख्यमूनविंशतिसर्गात्मकं महाकाव्यं चेति । ततश्च प्रसन्ना राजदारिकाः सप्रणयं वल्भं निषेवमाणा सुखमासीदिति । अत्र प्रतिपाद्यमानं तु गोपा लाय राज्ञः कन्यकप्रदानमसम्भवग्रस्तमिव प्रतिभाति । कविरयमुत्तरमारत एव प्रादुर्धत इति तत्र तत्रोत्तरभारतीयानामेवाचा- राणामनेनोपवर्णनात्प्रतीयते । मेघसन्देशे मार्गनिर्देशप्रस्तावेन तत्तानि पुर- ग्रामसरिदादीन्युपवर्णयन्नयमुज्जयिनीमेव विशेषतः सूक्ष्मतया चोपश्लोकयत

यनुमीयत एतस्योञ्जनन्यानैकान्तिकः पारचयः । स च न हि सुदूरवर्तन

**ऋतुसंहारम्**-सर्गषट्कात्मकमृतुवर्णनमिदं प्रसन्नमधुरं खण्डकाव्यम् ।

**कुमारसम्भवम्**-सप्तदशसर्गात्मकं मनोहरं महाकाव्यम् । एतच शिव पुराणीयां कथामुपजीव्य विरचितम् । अत्र च बहुषु स्थानेषु शिवपुराणी यपद्यानां छाया सन्दृश्यते । छायोपजीवित्वाचेदमेव प्राथमिकं महाकाव्यमेत स्येति समवगम्यते । एतच्च समग्रमापि कालिदासप्रणीतमेव । तत्र युक्त यस्त्वन्यत्र द्रष्टव्याः ।

**रघुवंशम्**-ऊनावंशतिसर्गात्मकं महाकाव्यमिदमतिमात्रहृदयङ्गमम् । मेघदूतम्- खण्डकाव्यामिदम् । अनिर्वचनीयमन्यादृशमेवास्य सर्वाङ्गर भणीयत्वम् । एकमात्रमप्येतत्काव्यं कवेरस्य विमलतमेन यशसा दिगन्त राण्यछकतु प्रभवत् ।

**अभिज्ञानशाकुन्तलम्**-सहृदयहृदयाहूदकं नाटकरत्नमिदम् । एत देवोद्दिश्य प्राचीनानामिदं पद्यम् ।

" **काव्येषु नाटकं रम्यं तत्रापि च शकुन्तला ।**

**तत्रापि च चतुर्थोऽङ्कस्तत्र श्लोकचतुष्टयम् ।**

**यास्यत्यंचेति तत्रापि श्लोकः सर्वमनोहरः ॥** " इति ।

अत्रत्यस्यैव कस्यापि वत्सळरसपारंस्यन्दिनः पवस्थ रसमास्वाद्य कोऽपि शार्मण्यदेशयः प्रमोदभरत्रिकसितान्तःकरणस्तदेकतानतामापन्नोऽसङ्गीतकं ननर्तेति श्रूयते ।

**विक्रमोर्वशीयम्**–पञ्चाकं त्रोटकमेतत् । अस्य च कमनीयतमत्वे प्रमाणं सुधियः ।

**मालविकाग्निमित्रम्**-पञ्चकं नाटकम् । अस्य च नाटकवे सन्दिहते केचिदर्वाचीनाः । तदसङ्गतम् । “ नाटकं ख्यातवृत्तं स्यात्पश्चसन्धसम-

न्वितम् । ’ इत्यादिनाटकलक्षणाक्रान्ततयैतस्य नाटकताया दुर्वारत्वात ।

न च नैतत्रख्यातवृत्तमिति भ्रमितव्यं विष्णुपुराणे कथांशस्यास्य प्रार्थि

तस्यात् । न चैतत्कालिदासप्रणीतमिति तु अममात्रं प्रमाणाभावात् । न च वर्णनात्येवात्र प्रमाणमिति वाच्यम् । एतस्य कालिदासप्रणीतत्वेऽपि तस्या एत्र प्रमाणभूतधात् । दृश्यंते ह्यत्र तथा विधानि कियन्ति गद्यानि च यानि खुवनिच्छतोऽपि बशदिव प्रत्याययन्न्यासः कालिदासप्रणीतस्वम्। तानि चात्र मालविकाया यतदवसानात्रस्थानवर्णनादिप्रस्तावे स्वयमेव दृश्यन्तां रसिकैः । विस्तरभयात्तु नात्र तान्युदाहर्तुमिच्छामः शति। एतद्विरचितेषु स्वशेषेष्वपि प्रबन्धेषु सुनिपुणं समालोच्यमानेषु प्रती यते महाकवित्वमिव पण्डियमपि श्रीमतः कालिदासस्योत विभाव्यतां प्रीरीति शिवम् ।

**इति महाकविश्रीकालिदास चरितसङ्क्षेपः ।**

**शाकुन्तलनाटकांतगत पात्राणि ।**

www.ignited.in

सूत्रधारः—नाटकाध्यक्षः | नटी--नाटकाध्यक्षस्य भाया. . दुष्यन्तः--नायकः शकुन्तला-नायिका विदूषकः--राज्ञो वयस्यः अनसूया ? शकुन्तलायाः भरतः--दुष्यन्तस्य पुत्रः | प्रियंवदा - सख्यौ सोमरातः-उपाध्यायः गौतमी–काचित्तापसी. वतकः चतुरका ३ करभकः परचारकाः | ॐ परभृतका / कंचुकी ) मधुकारेका * परिचारिकाः वैतालिकौस्तुतिपाठकैं. प्रतीहारी कण्वः ( काश्यपः )–शकुन्त- यवनी लाया पालकः पिता तरलिका ) वैखानसः । सानुमती---अप्सरा. अदतः -कश्यपस्य भायो शारद्वतः शिष्याः | वसुमती--भार्या. दुष्यन्तस्य हारीतः इतरपात्राणि | गतमः ॥ श्यालः-नगरपालकः मघवन्-इङ्गः सूचकः जयन्तः इन्द्रस्य पुत्रः जानुकः १ '| कौशिकः—विधामत्रार्षिः . ग्रामपालाः मातलिः - इन्द्रस्य सारथिः | मेनका--शकुंतलाया माता मारीचः ( कश्यपः ऋषिः दुर्वासा:--कश्चिदृषिः. सूत-सारार्थः

**नद-दवार्यः**

**शाकुंतलनाटकसारसंग्रह**

**प्रथमांके**-नान्दीपठनम् । ततः प्रस्तावनायां सूत्रधारेण नाटकीयस्य वस्तुन उपक्षेपः । मृगयाविहारी पार्थिवो दुष्यन्तः केनाप्यतिरंहसा सारद्रेण दूरं हृतोऽनुमालिनीतिरं कुलपतेः कप्पस्याश्रमं निकषा प्राप । यावच्च कृष्णसारस्य वधार्थे धनुषि शरं संदधाते तावत्केचित्तपस्विन उपेत्योन्यै राजानमब्रुवन् 'आश्रममृगोऽयं न हन्तव्यः' इति । तद्वचनानुरोधाप्रतिसंहृतसायकस्तैधाभिनन्द्य " चक्रवर्तिनं पुत्रवभानु हि ' इति कृताशीर्वचनस्तन्निदिष्टं कण्वाश्रमं प्रवेष्टुमैच्छद्राजा दुष्यन्तो विनीतवेषेण तपोवनं प्रविवेश । वृक्षसेचनव्यापृतमद्भुतरूपसंपत्कन्यकात्रयं ददर्श । तासां विश्रम्भालापेषु सख्योस्तन्नामग्रहणाच्छकुन्तलां ज्ञात्वा तस्या अव्याजमनोहरं रूपं दृष्ट्वा विस्मितो बभूव । पश्चात्ताभ्यां कथाप्रसंगेन शकुन्तलाया जन्मावृत्तान्तमुपलभ्य राजा तस्याः प्राप्तिं प्रति जाताशोऽ भवत् | शकुन्तलापि राजानं दृष्ट्वा तपोवनाविरोधिनो विकारस्य गमनीया संवृत्ता । अत्रान्तरे नृपस्यन्दनालोकभीतस्य वन्यगजस्य केनापि वनक सोच्चैरुद्घोषितं वनप्रवेशं श्रुत्वा सभ्रान्ताः कन्यका उत्तस्थुः । राजापि दर्शनेनैवै भवतीनां पुरस्कृतोऽस्मि तद्यथाश्रमवाधा न भवति तथा यतिष्य इत्युक्त्वा निष्क्रान्तः ।

**द्वितीयांके**-पूर्वोकोक्तस्य बीजस्य कामं प्रिया न सुलभेत्यादिना बहु लीकरणानन्तरमेतां प्रवृत्ति विदूषकोऽन्तःपुरे निवेदयेति संशय्य राजा परिहासाविजल्पितं सखे इत्यादिं वाक्येन स्वाभिमतगोपनपूर्वकं स्वनगरं प्रति विदुषकप्रस्थापनम् ।

**तृतीयांके**-नायकदर्शनसमुल्लासितमनोभवायाः शकुंतलाया विविधमद नावस्थानुभवः, राज्ञश्च स्वविषयानुरागनिश्चयेन तस्या उपळ्ळनपूर्वकमु भयमनोरथसंपादनं चाभ्यषार्णि ।

**चतुर्थांके**-नायकैकायतचित्तत्वेनाकृतातिथिसत्कारायाः शकुंतलायाः दुर्वासशापप्राप्तिः, तस्यांगुलीयकदर्शननिवत्येवरूपानुग्रहप्राप्तिः, ततः कण्वमहर्षिणा सौसुक्यवात्सल्यानुबंधं कुळपालिकाजनोचितधर्मानुशास-

नाशीर्वचनाद्यभिनंदनपूर्वकं शकुंतलाया भर्तृनगरप्रेषणं चाभ्यधायि ।

इह खलु सकलचिकुतलकः प्रसिद्धस्तत्रभवान् कालिदासनामा मकविर्नाट कांतं विरचभिते धिया नाटकरूपप्रबन्धं निर्भिदुश्चिकीर्षितस्य प्रभ्यस्याावेम्नेन परि समाप्तिमभिलषन् " आशीर्नमस्किया। वस्तुनिर्देशो वाऽपि तन्सुखम् ॥" इतश्चलंकारिक शासनमष्यनुमन् प्रकृतप्रबन्धप्रत्यूहपरिपंथिनों पूर्वरंगस्य प्रधानगतां नान्दीहशमाशिषं प्रनृके । या सृष्टिरित्यादिना । ताभिः प्रत्यक्षाभिरष्टाभिस्तनुभिः प्रपत्र ईशो वः अच त्विति योजना । कीदृशुस्तनव इत्यत आह-येति । या तनुः स्रष्टुबैमणः आदौ भवा यज्यते । अविधिहुतं भस्मीभवतेि । अत एव विधिहुमित्युक्तिः । अन्यथा हवनीयस्यैतद्व्यभिचारार्थपैनरुक्त्यं स्यात् । एतेनातिशय ध्वनितः । अथ च वह्निरियणादिके निप्रत्यये सिद्धम् । तदपि सूचितम् । या च होत्री यजमानरूपा । जुहोतीतेि हवीतीन्द्रादीनामपि तर्पकत्वा. दतिशयो व्यज्यते । अत एव नाम दियदप्रयोगः | ग्रे द' द्वे कालं रात्रिदिवरूपं विधत्तः कुतः। विपूर्वं ऽश् शथे धर्तते । चन्द्र कवित्यर्थः । नित्यस्यापि कालस्यैते कारणत्वेनोतायेते स एश्व | या च श्रुतिः श्रवणेन्द्रियं तस्य विषयो गोधरैः शुणः शब्दार्थौ यस्याः सा । धृतिः क्षेत्रे तथाम्नाये वर्तयाँ भन्नकमीणि १ इतेि विश्वः । । विधं जग-द्वयाप्य स्थिता तेनाकाशः ? अत्रादि अगद्वापकास्थित्या स व्यज्यते । अत एव श्रुतिविषयगुणेयेतावन्मात्रं नोत्तम् । तावयुच्यमाने प्रस्ता तिशयव्यङ्गयभङ्गः स्यात् । क्रेि च 'शदैकगुण आकश' श-५१गुणो मरुत् ' इत्यादिना सांख्यमते मरू अदीनामपि शब्दगुणःश्रयेते वैवक्षि तार्थ (थं) लभश्च । प्ररिशेप्याजळाभ इति चेत् £ आदिशक्येन तळाभोऽन्तेन वेति संदेहस्थ दुर्निसस्मारसूक्तं विश्वमिद६ ।

इह कथं चेदशन्नगणव्यतिरेकेण वा चकलाक्षणिकत्र्यं जकव्यपदेशभाजः शब्दान्निविधा भवति । याचकलक्षणकः शब्दः सर्वेषु साधरण थं जकः शब्दस्वरः पुनरसाधारणः ।

www.ignited.in

अभिधालक्षणाव्यापारगम्ययोरर्थयोरभिधेय लययोऽपर रखादिरूपः कश्चिदर्थः काव्ये समुपलभ्यने 1 स तु स्थक्षयार्थं एव । केचित्सृज्यत इति ग्रांप्रीति कर्मव्युत्पतिं वदन्ति । अत्र व्युत्पत्ती केचिदेनं परंचोदयति ब्रियां क्तिन्' इति क्तिनौ घरपवादय भावार्थकारस्वाद्भावपक्षेत्र प्रोग्रिते, सिद्धिः शुद्धिरेिक्ष्यदिवत् " अर्तरि च करके संज्ञायाम् ' इति एतद्वपवाद क्तिनोऽपि संज्ञायामेव पर्यवसानं स्याद् यथा श्रुतिः स्मृतेरिति । इदं नु श्रुटेिशब्दैन न कस्यापि प्रायवस्तुनः संज्ञा गम्यत इति कर्मव्युत्पत्त्यनुपपत्तिरिति। अत्रोच्यते "अकर्तरि च कारके " इत्यत्र संज्ञायामित्युपाधिवचनं त्रिकाभिप्रायं चशब्दा न संशया निवासंज्ञायामपि कर्मत्वादिः संपनीप्रद्यत इति ज्ञेयमुर्रव्याख्यातृभिः सेवन्भुमनुवर्तिष्यत इति फणिपतिफणितौ संबध्यत इति संबंधः कर्मणि षगिति न्यायाथि अतस्तदपवाद वात् किनोऽपि कर्मादिव्युत्पत्तिः सूपपादेति सृष्टिशब्देनेह सृष्टमेव दरवभिधीयते तच सृष्टिपदं त्वाद्यपदविशेषणत्रिशिष्टं सद्वचफमेव जलस्येति । विधिहुतमिति । विधिः प्रेरणा तद्वचछिष्टादिविशिष्टं विद्युद्देशवाक्यमवयवावयविसंबन्धजन्य लक्षण विधिरित्यभिधीयते।

## निष्कर्ष:

एतद्विध्युद्देशकांक्षित लदेशद्रव्यकर्मादिप्रतिपादकं दर्शपूर्णम सादिप्रकरणमपि लक्षतलक्षणया विधरिषभाणि । अथवा वाक्यैकवाक्यभ्यायेन तर वाव यभूताधिकार विधिवनियेगविधिप्रयोगविधियावयविशिष्टपूर्वचिथिवषयगत लि डादिविधिरित्युच्यते। तेन विधिना करणभूतेन हुतं प्रक्षि में हार्बः पुरोडाशादिकं A > कथितपदाशंक । उद्देश्य बिधेयार्थान्तरसंक्रमितवाच्यछटानुप्राप्तपरिह यैव तस्याङ्गीकारात् । 'अपवादविषयं परिहृत्योत्सर्गस्य प्रवृत्तिः' इति न्यायापुनरुक्तवदाभासेऽलंकारः। ताभिः प्रत्यक्षाभिरष्टाभिस्तनुभिः ताभः प्रपन्नो युक्त ईशो वोऽवस्यिथः । 'तनुभृतं त्वचि स्त्री भ्यत्रि- वल्मै विरले कुशे ' इति मेदिनीक । अत्राशिपि सभ्यानां लाभः । अत एव 'आशीर्नमास्क्रियारूपः' इति भरतेन, भासेनापे' आशीर्निमस्ति यावस्तु' इत्यादवेवाशीर्निबद्वा । तेनासं नटः किंनमम्भ्ररूपां तत्रापि काविघाशीरूपां नान्दीं पठिष्यतीति सोत्कण्ठानां सभ्यानां तामपनेतुं पूर्वमषवियुक्तिः । अत्र च सकलाभिलपितफलवितरणप्रघणस्वमेवावनं विवक्षितम् । पानार्थत्वाद्वातोः । तच्च तेन विना न संभवतीति । कानित्यपेक्षायां वो युष्मान्सभ्यानित्यर्थः । तेषामेवात्र संबोधनयोग्यत्वा संवोधनप्रधानत्वाच्च युष्मदर्थस्य।

## सन्दर्भ:

अभिज्ञानशाकुन्तलम्

अभिज्ञान शाकुंतलं में काव्य सौन्दर्य

---

**Corresponding Author**

**Nisha Kumari***

Research Scholar, CTU, Ahmadabad

www.ignited.in